# tulasyupaniShat

# તુલસ્યુપનિષત્

## Document Information

Text title : tulasyupaniShat

File name : tulasyupaniShat.itx

Category : upanishhat, tulasI, devii, devI

Location : doc_upanishhat

Transliterated by : Shree Devi Kumar

Proofread by : Shree Devi Kumar, Kasturi navya sahiti

Acknowledge-Permission: Mahaperiaval Trust

Latest update : June 12, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 11, 2025

*sanskritdocuments.org*

# તુલસ્યુપનિષત્

અથ તુલસ્યુપનિષદં વ્યાખ્યાસ્યામઃ । નારદ ઋષિઃ ।
અથર્વાઙ્ગિરાશ્છન્દઃ । અમૃતા તુલસી દેવતા ।
સુધાબીજમ્ । વસુધા શક્તિઃ । નારાયણઃ કીલકમ્ ।
શ્યામાં શ્યામવપુર્ધરાં ઋક્સ્વરૂપાં યજુર્મનસં બ્રહ્માથર્વપ્રાણાં
કલ્પહસ્તાં પુરાણપઠિતાં અમૃતોદ્ભવાં અમૃતરસમઞ્જરીં અનન્તાં
અનન્તરસભોગદાં વૈષ્ણવીં વિષ્ણુવલ્લભાં મૃત્યુજન્મનિબર્હિણીં
દર્શનાત્પાપનાશિનીં સ્પર્શનાત્પાવનીં અભિવન્દનાદ્ રોગનાશિનીં સેવનાત્
મૃત્યુનાશિનીં વૈકુણ્ઠાર્ચનાત્ વિપદ્ધન્ત્રીં, ભક્ષણાત્ વયુનપ્રદાં ,
પ્રાદક્ષિણ્યાત્ દારિદ્ર્યનાશિનીં, મૂલમૃલ્લેપનાત્ મહાપાપભઞ્જિનીં
ઘ્રાણતર્પણાત્ અન્તર્મલનાશિનીં ય એવં વેદ સ વૈષ્ણવો ભવતિ ।
વૃથા ન છિન્દ્યાત્ । દૃષ્ટ્વા પ્રદક્ષિણં કુર્યાત્ ।
દ્વાદશ્યાં ન સ્પૃશેત્ । પર્વણિ ન વિચિન્વેત્ ।
યદિ વિચન્વતિ સ વિષ્ણુહા ભવતિ । શ્રી તુલસ્યૈ સ્વાહા ।
વિષ્ણુપ્રિયાયૈ સ્વાહા । અમૃતાયૈ સ્વાહા ।
શ્રી તુલસ્યૈ વિદ્મહે વિષ્ણુપ્રિયાયૈ ધીમહિ । તન્નો અમૃતા પ્રચોદયાત્ ।
અમૃતેઽમૃતરૂપાઽસિ અમૃતત્વપ્રદાયિનિ ।
ત્વં મામુદ્ધર સંસારાત્ ક્ષીરસાગર કન્યકે ॥ ૧
શ્રીસખિ ત્વં સદાનન્દે મુકુન્દસ્ય સદા પ્રિયે ।
વરદાભયહસ્તાભ્યાં માં વિલોકય દુર્લભે ॥ ૨
અવૃક્ષવૃક્ષરૂપાઽસિ વૃક્ષત્વં મે વિનાશય ।
તુલસ્યતુલરૂપાઽસિ તુલાકોટિનિભેઽજરે ॥ ૩
અતુલે ત્વત્તુલાયાં હિ હરિરેકોઽસ્તિ નાન્યથા ।
ત્વમેવ જગતાં ધાત્રી ત્વમેવ વિષ્ણુવલ્લભા ॥ ૪
ત્વમેવ સુરસંસેવ્યા ત્વમેવ મોક્ષદાયિની ।
ત્વચ્છાયાયાં વસેલ્લક્ષ્મીઃ ત્વન્મૂલે વિષ્ણુરવ્યયઃ ।

સમન્તાદ્ દેવતાઃ સર્વાઃ સિદ્ધચારણપન્નગાઃ ॥ ૫
યન્મૂલે સર્વતીર્થાનિ યન્મધ્યે બ્રહ્મ દેવતાઃ ।
યદગ્રે વેદશાસ્ત્રાણિ તુલસીં તાં નમામ્યહમ્ ॥ ૬
તુલસિ શ્રીસખિ શુભે પાપહારિણિ પુણ્યદે ।
નમસ્તે નારદનુતે નારાયણમનઃ પ્રિયે ॥ ૭
બ્રહ્માનન્દાશ્રુસઞ્જાતે વૃન્દાવનનિવાસિનિ ।
સર્વાવયસમ્પૂર્ણે અમૃતોપનિષદ્રસે ॥ ૮
ત્વં મામુદ્ધર કલ્યાણિ મહાપાપાબ્ધિદુસ્તરાત્ ।
સર્વેષામપિ પાપાનાં પ્રાયશ્ચિત્તં ત્વમેવ હિ ॥

દેવાનાં ચ ઋષીણાં ચ પિતૃણાં ત્વં સદા પ્રિયા ॥ ૯
વિના શ્રીતુલસીં વિપ્રા યેઽપિ શ્રાદ્ધં પ્રકુર્વતે ।
વૃથા ભવતિ તચ્છ્રાદ્ધં પિતૃણાં નોપગચ્છતિ ॥ ૧૦
તુલસીપત્રમુત્સૃજ્ય યદિ પૂજાં કરોતિ વૈ ।
આસુરી સા ભવેત્પૂજા વિષ્ણુપ્રીતિકરી ન ચ ॥ ૧૧
યજ્ઞં દાનં જપં તીર્થં શ્રાદ્ધં વૈ દેવતાર્ચનમ્ ।
તર્પણં માર્જનં ચાન્યન્ન કુર્યાત્ તુલસીં વિના ॥ ૧૨
તુલસીદારુમણિભિર્જપઃ સર્વાર્થસાધકઃ ।
એવં ન વેદ યઃ કશ્ચિત્ સ વિપ્રઃ શ્વપચાધમઃ ॥ ૧૩
ઇત્યાહ ભગવાન્ બ્રહ્માણં નારાયણઃ ,બ્રહ્મા નારદસનકાદિભ્યઃ,
સનકાદયો વેદવ્યાસાય, વેદવ્યાસઃ શુકાય, શુકો વામદેવાય, વામદેવો
મુનિભ્યઃ , મુનયો મનુભ્યઃ પ્રોચુઃ ।
ય એવં વેદ, સ સ્ત્રીહત્યાયાઃ પ્રમુચ્યતે, સ વીરહત્યાયાઃ પ્રમુચ્યતે,
સ બ્રહ્મહત્યાયાઃ પ્રમુચ્યતે, સ મહાભયાત્
પ્રમુચ્યતે, સ મહાદુઃખાત્પ્રમુચ્યતે, દેહાન્તે વૈકુણ્ઠમવાપ્નોતિ
વૈકુણ્ઠમવાપ્નોતિ । ઇત્યુપનિષત્ ।
(વૈષ્ણવ-ઉપનિષદઃ)

ઇતિ તુલસ્યુપનિષત્ સમાપ્તા ।

Encoded and proofread by Shree Devi Kumar
Kasturi navya sahiti

*tulasyupaniShat*

pdf was typeset on May 11, 2025

Please send corrections to *sanskrit@cheerful.com*